# ॥ वाल्मीकि रामायण॥

## ४ किष्किन्धाकाण्ड

### अध्याय ३

वचो विज्ञाय हनुमान्सुग्रीवस्य महात्मनः ।
पर्वतादृश्यमूकात्तु पुप्लुवे यत्र राघवौ ॥ १॥

स तत्र गत्वा हनुमान्बलवान्वानरोत्तमः ।
उपचक्राम तौ वाग्भिर्मृद्वीभिः सत्यविक्रमः ॥ २॥

स्वकं रूपं परित्यज्य भिक्षुरूपेण वानरः ।
आबभाषे च तौ वीरौ यथावत्प्रशशंस च ॥ ३॥

राजर्षिदेवप्रतिमौ तापसौ संशितव्रतौ ।
देशं कथमिमं प्राप्तौ भवन्तौ वरवर्णिनौ ॥ ४॥

त्रासयन्तौ मृगगणानन्यांश्च वनचारिणः ।
पम्पातीररुहान्वृक्षान्वीक्षमाणौ समन्ततः ॥ ५॥

इमां नदीं शुभजलां शोभयन्तौ तरस्विनौ ।
धैर्यवन्तौ सुवर्णाभौ कौ युवां चीरवाससौ ॥ ६॥

सिंहविप्रेक्षितौ वीरौ सिंहातिबलविक्रमौ ।
शक्रचापनिभे चापे प्रगृह्य विपुलैर्भुजैः ॥ ७॥

श्रीमन्तौ रूपसम्पन्नौ वृषभश्रेष्ठविक्रमौ ।
हस्तिहस्तोपमभुजौ द्युतिमन्तौ नरर्षभौ ॥ ८॥

प्रभया पर्वतेन्द्रोऽयं युवयोरवभासितः ।
राज्यार्हावमरप्रख्यौ कथं देशमिहागतौ ॥ ९॥

पद्मपत्रेक्षणौ वीरौ जटामण्डलधारिणौ ।
अन्योन्यसदृशौ वीरौ देवलोकादिवागतौ ॥ १०॥

यदृच्छयेव सम्प्राप्तौ चन्द्रसूर्यौ वसुन्धराम् ।
विशालवक्षसौ वीरौ मानुषौ देवरूपिणौ ॥ ११॥

सिंहस्कन्धौ महासत्त्वौ समदाविव गोवृषौ ।
आयताश्च सुवृत्ताश्च बाहवः परिघोत्तमाः ।
सर्वभूषणभूषार्हाः किमर्थं न विभूषितः ॥ १२॥

उभौ योग्यावहं मन्ये रक्षितुं पृथिवीमिमाम् ।
ससागरवनां कृत्स्नां विन्ध्यमेरुविभूषिताम् ॥ १३॥

इमे च धनुषी चित्रे श्लक्ष्णे चित्रानुलेपने ।
प्रकाशेते यथेन्द्रस्य वज्रे हेमविभूषिते ॥ १४॥

सम्पूर्णा निशितैर्बाणैर्तूणाश्च शुभदर्शनाः ।
जीवितान्तकरैर्घोरैर्ज्वलद्भिरिव पन्नगैः ॥ १५॥

महाप्रमाणौ विपुलौ तप्तहाटकभूषितौ ।
खड्गावेतौ विराजेते निर्मुक्तभुजगाविव ॥ १६॥

एवं मां परिभाषन्तं कस्माद्वै नाभिभाषथः ॥ १७॥

सुग्रीवो नाम धर्मात्मा कश्चिद्वानरयूथपः ।
वीरो विनिकृतो भ्रात्रा जगद्भ्रमति दुःखितः ॥ १८॥

प्राप्तोऽहं प्रेषितस्तेन सुग्रीवेण महात्मना ।
राज्ञा वानरमुख्यानां हनुमान्नाम वानरः ॥ १९॥

युवाभ्यां सह धर्मात्मा सुग्रीवः सख्यमिच्छति ।
तस्य मां सचिवं वित्तं वानरं पवनात्मजम् ॥ २०॥

भिक्षुरूपप्रतिच्छन्नं सुग्रीवप्रियकाम्यया ।
ऋश्यमूकादिह प्राप्तं कामगं कामरूपिणम् ॥ २१॥

एवमुक्त्वा तु हनुमांस्तौ वीरौ रामलक्ष्मणौ ।
वाक्यज्ञौ वाक्यकुशलः पुनर्नोवाच किं चन ॥ २२॥

एतच्छ्रुत्वा वचस्तस्य रामो लक्ष्मणमब्रवीत् ।
प्रहृष्टवदनः श्रीमान्भ्रातरं पार्श्वतः स्थितम् ॥ २३॥

सचिवोऽयं कपीन्द्रस्य सुग्रीवस्य महात्मनः ।
तमेव काङ्क्षमाणस्य ममान्तिकमुपागतः ॥ २४॥

तमभ्यभाष सौमित्रे सुग्रीवसचिवं कपिम् ।
वाक्यज्ञं मधुरैर्वाक्यैः स्नेहयुक्तमरिन्दमम् ॥ २५॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com